नं: १२६ - घ (क)

परिभाषाः

पत्राणि - २ - १०

नं०: १२६ - घ
/क

परिभाषासूत्र

पत्रे २ एव

१२६ क

२ पत्रे

नं०: १२६-घ
परिभाषा:
पत्रे २ एव

श्रीगणेशाय नमः ॥ व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणं ॥ नहि कार्यी निमित्तत्वेनाश्रीयते ॥ इतरेतरा
श्रयाण्यपि कार्याणि शास्त्रे प्रकल्प्यन्ते ॥ यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ निर्दिश्यमानस्यादेशा भवन्ति ॥
नानुबंधकृतमनेकाल्त्वम् ॥ वर्णाश्रयविधौ प्रत्ययलोपलक्षणपरिभाषा नास्ति ॥ क्वचिदेकदेशोप्यनुवर्त्तते ॥ अर्थ
वर्णा ४ वद्ग्रहणे नानर्थकस्यान ग्रहणेषु ॥ भाव्यमानोऽण् सवर्णान्न गृह्णाति ॥ यस्मिन् विधिस्तदादावल्ग्रहणे ॥ विधिविधा
नविधिभाजां त्रयाणां सन्निधौ न तदंतविधिर्नास्ति ॥ प्रकृत्यागानिर्दिष्टानां सह प्रवृत्तिः सह वा निवृत्तिः ॥ उणादयोऽव्युत्प
न्नानि प्रातिपदिकान्यानि ॥ सर्वो द्वंद्वो विभाषयैकवद्भवति ॥ कृदादिपादः ॥ उदित्सवर्णग्रहणानि न सवर्णमात्रं
प्रकृतिवदनुकरणं भवति ॥ विकरणेभ्यो नियमो बलीयान् ॥ भूपादः ॥ सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव
पुनः प्रसंगाविज्ञानात्सिद्धं ॥ अंतरंगबहिरंगयोरंतरंगे बलवान् ॥ उभयनिर्देशे पंचमीनिर्देशो बलीयान् ॥ सर्वे वि
धयश्छंदसि विकल्प्यन्ते ॥ प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदंतस्य ग्रहणं ॥ नस्त्रीप्रत्यये चानुपसर्जने ॥ संज्ञा
विधौ प्रत्ययग्रहणे तदंतविधिर्नास्ति ॥ कडारपवादः ॥ प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणं ॥ विभक्तौ
लिंगविशिष्टस्याग्रहणं ॥ समर्थपादः ॥ सूत्रे लिंगविशिष्टस्याग्रहणं ॥ वचनमतंत्रं ॥ नञिवयुक्तमन्यसदृशाधिक
रणे तथा ह्यर्थगतिः ॥ गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेः ॥ अपरपादः ॥ क्वचिदपवादविषये

ऽप्युत्सर्गोऽभिनिविशते ॥ अनपिहितपादः ॥ अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते ॥ द्विगुपादः ॥ असति संभवे बाधनं भव
त्यस्ति च संबंधे ॥ षडुभयं स्यात् ॥ कल्पद्रुमखलर्थेषु वा सरूपविधिर्नास्ति ॥ सांप्रतिकाभावे भूतपूर्वगतिः ॥ नानुबंधकृत
मसारूप्यं ॥ प्रत्ययपवादः ॥ लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तुलासारिकस्य ॥ एकदेशविकृतमनन्य
वद्भवति ॥ क्वचिद्विकृतिः प्रकृतिं गृह्णाति ॥ बहुव्रीहौ न गुणसंविज्ञानमपि ॥ नाछीलिकेषु वा सरूपविधिर्नास्ति ॥ कर्म्म
णिपादः ॥ पुरस्तादपवादा अनंतरान्विधीन्बाधंते ॥ नेतरान् ॥ वहुपादः ॥ नानुबंधकृतमनेजंतत्वं ॥ नानुकृष्टमुत्तरत्र
वनाभिसंबध्यते ॥ संबंधपादः ॥ मध्येपवादाः पूर्वान्विधीन्बाधन्ते ॥ नोत्तरान् ॥ अनंतरस्य विधिर्भवति प्रतिषेधो वा
अकृतव्यूहाः पाणिनीयाः कृतमपि शास्त्रं निवर्त्तयन्ति ॥ आप्पादः ॥ निरनुबंधकग्रहणे न सानुबंधकस्य ॥ एकानुबं
धकग्रहणे न द्व्यनुबंधकस्य ॥ तदनुबंधकग्रहणे नानर्थकस्य ॥ रक्पादः ॥ स्वरविधौ व्यंजनमविद्यमानवत् ॥ युष्म
त्पादः ॥ क्रियाविशेषणानां कर्म्मत्वं नपुंसकलिंगता च ॥ उरपादः ॥ ग्रहणवता प्रातिपदिकेन तदंतविधिर्ना
स्ति ॥ व्यपदेशिवद्भावो ऽप्रातिपदिकेन ॥ समासप्रत्ययविधौ न तदंतविधिप्रतिषेधः उगिद्वर्णग्रहणवर्जं ॥ धात्वपादः ॥ श्रीः
स्वार्थिकाः प्रत्ययाः क्वचित्प्रकृतितो लिंगवचनान्यनुवर्त्तन्ते पि ॥ स्यतपादः ॥ संप्रसारणं संप्रसारणाश्रयं च बलीयः १
उभयत्र याश्रयणे नांतादिवत् ॥ वर्णाश्रयविधौ नांतादिवत् ॥ एकाच्पादः ॥ कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रह

लं॥ समासान्तविधिरनित्यः॥ बहुव्रीहिपादः॥ सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य॥ अनिनस्मिन्ग्रहणान्य
र्थवता चानर्थकेन च तदंतविधिं प्रयोजयन्ति॥ वार्णादांगं बलीयः॥ यान्त्वनादिष्टादचः पूर्वत्वस्य विधिं प्रतिस्थानि
वत्॥ अलुक्पादः॥ प्रकृतिग्रहणे यङ्लुगंतस्यापि ग्रहणं॥ असिद्धं बहिरंगमंतरंगे॥ नाजानंतर्येन प्रकृतिः॥ संज्ञापूर्व
को विधिरनित्यः॥ संनियोगविशिष्टानामन्यतरापाये उभयोरप्यपायः॥ ताच्छीलिके णि अपकृतं कार्यं भवति धा
तोः॥ कार्यमुच्यमानं धातुप्रत्ययपूर्वं भवति॥ अगपादः॥ न मध्येपतितस्तद्ग्रहणेन गृह्यते॥ बाधकान्यपि निपातना
नि भवन्ति॥ अंगाधिकारे तस्य तदुत्तरपदस्य च॥ प्रत्येकं वाक्यपरिसमाप्तिः॥ क्वचित्समुदायेन वाक्यपरिसमाप्तिः
अभेदका ईहशास्त्रे गुणाः॥ पुपादः॥ औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणं न प्रायोगिकस्य॥ सर्व
विधिभ्य इति विधिर्बलवान्॥ लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणं॥ वर्णान्तप्रवृत्तस्येहकार्यानित्ति
त्ते॥ अत्रांगानपि विधीन्बहिरंगो लुग्बाधते॥ सिच्यादः॥ मन्त्यपि साधनं भवति॥ पर्यर्जन्यवल्लक्षणप्रवृत्तिः॥ ग
भवद्वावादयो भवन्ति॥ विधौ परिभाषोपतिष्ठन्ति नानुवादे॥ प्रकृतिग्रहणे ण्याधिकस्यापि ग्रहणं॥ अंगवृत्ते पुनर
र्वृत्तावविधिर्निष्ठितस्य॥ दीपिकापादः॥ पूर्वत्रासिद्धे न स्थानिवत्॥ उपजातनिमित्तोप्युत्सर्गे उपजातस्य समा
णानिमित्ते नापवादेन बाध्यते॥ परिहृत्यापवादविषयमुत्सर्गोऽभिनिविशते॥ येन कृतं स्थानिवद्भवति॥ अपा

2

वादविकारेष्वपवादा नोत्सर्गान्बाधन्ते नोन्नशान्तो पादः ॥ पूर्वत्रासिद्धीयमद्विर्वचने ॥ सर्वे पादः ॥ अनित्यमाग
मशासनं ॥ निमित्तापाये नैमित्तिकस्याप्यपायः ॥ गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ॥ कृत्रिमाकृत्रिमयोः कृत्रिमे
कार्यसंप्रत्ययः ॥ प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः ॥ उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ अवयवप्र
सिद्धेः समुदायवृद्धिर्बलीयसी ॥ गमादायग्रहणे स्वविशेषः ॥ समासप्रत्ययानिर्देशे विशेषस्यानिर्देशः ॥ श्रुतानुमि
तयोः ॥ श्रौतः संबन्धो बलीयान् ॥ अनित्यविकारोऽन्यादेशादेशस्य ॥ नानार्थके लोपविधिः ॥ प्रत्ययाप्रत्यययोः प्रत्यय
स्यैव ग्रहणं ॥ सहचरितासहचरितयोः सहचरितस्यैव ग्रहणं ॥ यथोद्देशं संज्ञापरिभाषं ॥ गणकार्यमनित्यं ॥ सन्
देहवद्वचनं प्रयोक्तव्यं ॥ अर्थाद्विभक्तिविपरिणामः ॥ योगविभागादिष्टसिद्धिः ॥ पर्यायशब्दानां गुरुलाघवचिन्ता
नाश्रियते ॥ अगत्या बलपरिभाषाऽऽश्रीयते ॥ व्यवस्थितविभाषया कार्याणि क्रियन्ते ॥ अनिर्दिष्टार्थाः प्रत्ययाः
स्वार्थे भवन्ति ॥ तापकृत्सिद्धं न सर्वत्र ॥ युगपदधिकरणवचने द्वन्द्वः ॥ पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण
अन्ये तु पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन ॥ समासकृत्तद्धितेषु संबन्धाभिधानमन्यत्र रूप
भिन्नरूपाण्यभिचारितसंबन्धेभ्यः ॥ इति परिभाषासमाप्ता ॥ ॥

